Mozilla File Edit View Go Bookmarks Tools Window Help Debug QA Mar 10:43
Mozilla {Build ID: 2002091014}
Back Forward Reload Stop file:///Documents/xml/adi.xml Search Print
Home Bookmarks

# Paramārthasāra

October 2002

## परमार्थसारम्

परं परस्याः प्रकृतेरनादिमेकं निविष्टं बहुधा गुहासु ।
सर्वालयं सर्वचराचरस्थं त्वामेव विष्णुं शरणं प्रपद्ये ॥ १ ॥
आत्माम्बुराशौ निखिलोऽपि लोको मग्नोऽपि नाचामति नेक्षते च ।
आश्चर्यमेतन्मृगतृष्णिकाभे भवाम्बुराशौ रमते मृषैव ॥ २ ॥
गर्भगृहवाससंभवजन्मजरामरणविप्रयोगाब्धौ ।
जगदालोक्य निमग्नं प्राह गुरुं प्राञ्जलिः शिष्यः ॥ ३ ॥
त्वं साङ्गवेदवेत्ता भेत्ता संशयगणस्य ऋतवक्ता ।
संसारार्णवतरणप्रश्नं पृच्छाम्यहं भगवन् ॥ ४ ॥

Done